इत्यादीनि सर्वाण्यपि रूपाणि चिरिधातुवत् (526) बोध्यानि। [1]जिरिण्वन्[A]-ती।

## (604) " जिवि प्रीणने " (I-भ्वादिः-594. सक. सेट्. पर.)

[2]जिन्वकः-न्विका, जिन्वकः-न्विका, जिजिन्विषकः-षिका, जेजिन्वकः-न्विका ;
जिन्विता-त्री, जिन्वयिता-त्री, जिजिन्विषिता-त्री, जेजिन्विता-त्री ;
[B]जिन्वन्-न्ती, जिन्वयन्-न्ती, जिजिन्विषन्-न्ती ; —
— जिन्वयमानः, जिन्वयिष्यमाणः, — जेजिन्व्यमानः, जेजिन्विष्यमाणः ;
[3]प्रजिन्-प्रजिन्वौ-प्रजिन्वः ; — —
जिन्वितम्-तः, जिन्वितः, जिजिन्विषितः, जेजिन्वितः-तवान् ;
जिन्वः, जिन्वः जिजिन्विषुः, जेजिन्वः ;
जिन्वितव्यम्, जिन्वयितव्यम्, जिजिन्विषितव्यम्, जेजिन्वितव्यम्,
जिन्वनीयम्, जिन्वनीयम्, जिजिन्विषणीयम, जेजिन्वनीयम् ;
जिन्व्यम्, जिन्व्यम्, जिजिन्विष्यम्, जेजिन्व्यम्,
ईषज्जिन्वः, दुर्जिन्वः-सुजिन्वः ; — —
जिन्व्यमानः, जिन्व्यमानः, जिजिन्विष्यमाणः, जेजिन्व्यमानः ;
जिन्वः, जिन्वः, जिजिन्विषः, जेजिन्वः ;
जिन्वितुम्, जिन्वयितुम्, जिजिन्विषितुम्, जेजिन्वितुम् ;
[4]जिन्वा, जिन्वना, जिजिन्विषा, जेजिन्वा ;
जिन्वनम्, जिन्वनम्, जिजिन्विषणम्, जेजिन्वनम्,
जिन्वित्वा, जिन्वयित्वा, जिजिन्विषित्वा, जेजिन्वित्वा ;
सञ्जिन्व्य, सञ्जिन्व्य, सञ्जिजिन्विष्य, सञ्जेजिन्व्य ;

---

1. 'स्वादिभ्यः—' (3-1-73) इति श्नुः विकरणप्रत्ययः। 'हुश्नुवोः सार्वधातुके' (6-4-87) इति यण्। णत्वम्।
2. 'इदितो नुम् धातोः' (7-1-58) इति नुम्। एवं सर्वत्र नुम्।
3. क्विपि, 'संयोगान्तस्य—' (8-2-23) इति वकारस्य संयोगान्तलोपः।
4. 'गुरोश्च हलः' (3-3-103) इति स्त्रियामकारप्रत्ययः।

A. 'क्ष्मां दघ्नुवन् मखचमिव्यसनानि रिण्वन् ऋक्षिण्वतां चिरयणैरपथं, जिरिण्वन्।' धा. का. 2.71.

B. 'जिन्वन्तमुर्वीं निजरिण्वनैः सतां रण्वन्तमन्तर्भवधन्वपादपम्।' धा. का. 1.76.